श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीभाष्यकार अवयव विशेष श्लोकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीभाष्यकार अवयव विशेष श्लोकम् ॥

मस्तकः श्रीशठारातिः नाथार्यो मुखमण्डलम्।
नेत्रयुग्मं सरोजाक्षः कपोलौ राघवस्तथा ॥ 1 ॥

वक्षस्स्थलं यामुनार्यः कण्ठः पूर्णो महांस्तथा।
गोष्ठीपूर्णो बाहुयुग्मं शैलपूर्णः स्तनद्वयम् ॥ 2 ॥

कुक्षिस्तु वररङ्गार्यः पृष्ठं मालाधरस्तथा।
कटिः काञ्चीमुनिर्ज्ञेयः गोविन्दार्यो नितम्बकः ॥ 3 ॥

भट्टवेदान्तिनौ जङ्घे ऊरुयुग्मं जगद्गुरुः।
जानुयुग्मं कृष्णपादो लोकार्यः पादपङ्कजे ॥ 4 ॥

श्रीशैलनाथस्तद्रेखा पादुके वरयोगिराट्।
पुण्ड्रः सेनापतिः प्रोक्तः सूत्रं कूरपतिस्तथा ॥ 5 ॥

भागिनेयस्त्रिदण्डश्च काषायश्चान्ध्रपूर्णकः।
मालाश्च कुरुकेशार्यः छाया श्रीचापकिङ्करः ॥ 6 ॥

एवं रामानुजार्यस्यावयवानखिलान् गुरून्।
महान्तञ्चावयविनं रामानुजमुनिं भजे ॥ 7 ॥

गुरुमूर्त्यात्मयोगीन्द्रं यो ध्यायेत् प्रत्यहं नरः।
सर्वान् कामानवाप्नोति लभेच्चान्ते परंपदम् ॥ 8 ॥

॥ इति श्रीभाष्यकार अवयव विशेष श्लोकं समाप्तम् ॥

sunder kidāmbi prapatti dot com